This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८५

॥श्री गणेशाय नमः ॥ श्री सद्गुरुचरणाभ्यां नमः ॥ श्री
विट्ठलप्रसन्नः । वासुदेवेंद्रयोगींद्रं नत्वा ज्ञानप्रदं गुरुं ॥
मुमुक्षूणां हितार्थाय तत्त्वबोधोऽभिधीयते ॥१॥ सा
धनचतुष्टयसंपन्नाधिकारिणां मोक्षसाधनभू
ततत्त्वविवेकः प्रकारं वक्ष्यामः ॥ साधनचतुष्टयं
कीदृशमिति चेत् ॥ नित्यानित्यवस्तुविवेकः इहा
मूत्रफलभोगविरागः शमादिषट्कसंपत्तिर्मुमुक्षु

५.

त० त्वं चेति ॥ नित्यानित्यवस्तुविवेकः कीदृश इति चेत् ॥
नित्यं वस्त्वेकं ब्रह्म तद्व्यतिरिक्तं सर्वमनित्यं ॥ अ
यमेव नित्यानित्यवस्तुविवेकः ॥ इहामुत्रफल
भोगविरागः कीदृश इति चेत् ॥ इहास्त्रक्चंदनव
॥३॥ नितादिषु अमुत्र स्वर्गभोगादिषु च इच्छाराहित्य
मेव इहामुत्रफलभोगविरागः ॥ भास्मानुवत् ॥
शमादिषट्कसंपत्तिः कीदृशी शमः कः ॥

KKSU LIBRARY
RAMTEK
441 106
M 1449
Dist. Nagpur

Checked 2012

Acc. No. ~~1508~~. M1449
Title - निरालम्ब उपनिषद् (संपूर्ण)
Author - ?
Date - शके 1733
Sub - उपनिषत्
folio - 20
Xerox - 20



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तप: स्वधर्मानुष्ठानमेव तप: २

शमदम उपरति तितिक्षा श्रद्धा समाधानं ॥ शम:
कीदृश इत्येत ॥ अंतरिंद्रियनिग्रहमेव शम: ॥ द
म: कीदृ० बाह्येंद्रियनिग्रहमेव दम: ॥ उपरति: की
दृशी० विषयोपरमणमेव उपरति: ॥ तितिक्षा की
दृशी० शीतोष्णादिसुखदु:खसहिष्णुत्वमेव तिति
क्षा ॥ श्रद्धा कीदृ० गुरुवेदांतवाक्यादिषु विश्वास
एव श्रद्धा ॥ समाधानं कीदृ० ॥ चित्तैकाग्रतामात्र समाधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गं०　　　　　　　　　　　　　　　　　　　　　　　　बो

नंबिति छद्मं ॥ मुमुक्षुत्वं की ह० ॥ स्वयं मोक्षं आप्नुयादि
तिभावो यद्दास्ति तन्मुमुक्षुत्वं ॥ एतत् साधनचतुष्टय
यं तेषां तद्विवेकस्याधिकारिणो भवंति ॥ तद्विवे
॥२१॥ कः की ह० ॥ आत्मा सत्यं आत्मनो ऽन्यत् सर्वं मिथ्येति ज्ञानं
मेव तद्विवेकः ॥ (आत्मा की ह० स्थूलसूक्ष्मका
रणेभ्यो व्यतिरिक्तः पंचकोशातीतः अवस्थात्रय
साक्षी ॥ सच्चिदानंदस्वरूपः सन् यस्तिष्ठति स आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

2

दिता दधो अर्विंदिता दधि ॥ विज्ञानं ब्रह्म ॥ प्रज्ञा प्रतिष्ठा ॥ प्रज्ञानं
ब्रह्म ॥ ब्रह्म प्रज्ञानं ॥ ब्रह्मज्योतिरहमों ॥ छ ॥ इति पंचीकरणोपनि
षत्समाप्तं ॥ श्रीरामचंद्रार्पणमस्तु ॥ छ ॥ ॥ छ ॥ ॥ ॥ छ ॥

॥ श्रीरामचंद्र ॥ ॥ श्रीगुरुभ्यो ॥ ॥ श्रीविठ्ठल ॥

॥ अथ निरालंबोपनिषत्प्रारंभः ॥ ॥ हरिः ॐ ॥ ई
श्वरो गुरुरात्मेति मूर्तिभेदाद्विभागिने ॥ व्योमवद्व्या
प्तदेहाय दक्षिणामूर्तये नमः ॥ १ ॥ ॐ निरालंबं
तं ज्ञात्वा निरालंब सनातनं ॥ निरालंब तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यानं निरालं व सदा शिवः ॥ नमः शिवाय गुरुरूपे सच्चि
दानंद मूर्तये ॥ निष्प्रपंचाय शांताय निरालंबाय तेजसे ॥
एवाम ज्ञान जीवानां समस्तारिष्टशांतये ॥ पद्म हृदय व्योम
॥३॥ मरिचलं समाशांकल अवीम्यहं ॥ किं ब्रह्म ॥ क ईश्वरः ॥ कोजी
वः ॥ का प्रकृतिः ॥ कः परमात्मा ॥ को ब्रह्मा ॥ को विष्णुः ॥ को रु
द्रः ॥ क इंद्रः ॥ कः शमनः ॥ कः सूर्यः ॥ कः चंद्रमाः ॥ के सुराः ॥
के चासुराः ॥ के पिशाचाः ॥ के मनुष्याः ॥ काः स्त्रियः ॥ के पश्वा
दयः ॥ किं स्थावरं ॥ के ब्राह्मणादयः ॥ का जातिः ॥ किं कर्म ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किमकर्म॥ किंतपः॥ किमासुरं॥ किंज्ञानं॥ किमज्ञानं॥ को
बंधः॥ कोमोक्षः॥ किंसुखं॥ किंदुखं॥ कःस्वर्गः॥ कोवानरकः॥
किंपरमंपदं॥ किंउपास्यं॥ कोविद्वान्॥ कोमूढः॥ कः संन्या
सी॥ किंग्राह्यं॥ किमग्राह्यं॥ इत्याशंक्याह॥ श्रृंखलेतिच॥ म
हदहंकारपृथिव्यापस्तेजोवायुराकाशात्मनामहद्रूपेणा
उक्तोज्ञेनकर्मज्ञानार्थरूपनयाभासमानंअद्वितीयम
खिलोपाधिविनिर्मुक्तंसर्वशक्त्युपबृंहितमनाद्यंतंशु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धं हि यं रूपं तं निर्गुणमित्यादिवाच्यमनिर्वाच्यं चैतन्यं अ
त्मा। ईश्वर इति च॥ एतल्लक्षणं ब्रह्मैव स्वशक्तिप्रकृतिमा
श्रित्य जीवान् सृष्ट्वा प्रविष्टं तर्यामित्वेन ब्रह्मादीनां बुद्ध्या
दींद्रियनियंतृत्वादीश्वरः। जीव इति च॥ ईश्वर एव प्रकृ
मा। तिगुणविकारमयलोकतुलाविष्णुरुद्रेंद्रादिनामरूपधा
री स्थूलोहमित्यध्यासवशात् जीवः सोयमेकोपि देहो
द्भिमिति ममताभेदात् बहुजीवाः॥ अवस्थितिरिति च॥ अल
णप्रकाराणां नानाविचित्रजगन्निर्माणसामर्थ्यात् बुद्धि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

4

+ स्थूलशरीरं १

ध्यां यद्धि लियते तदन्नमयकोशः ॥ प्राणमयकोशं कीदृशं ॥ प्राणादिपंचवायवः प्राणमयकोशः ॥ मनोमयकोशः
कीदृशः ॥ मनश्च कर्मेंद्रियपंचकं मिलितां मनोमयको
शः ॥ विज्ञानमयकोशः कीदृशः ० बुद्धिश्च ज्ञानेंद्रियपंच
कं मिलितां विज्ञानमयकोशः ॥ आनंदमयकोशः कीदृशः ॥
पूर्वोक्तकारणशरीरमेव आनंदमयकोशः ॥ एतत्कोशपं
कं मदीयं मदीयाः प्राणाः मदीयं मनश्च मदीया बुद्धिर्म
दीयं ज्ञानमिति स्वेनैव ज्ञायते तद्यथा ॥ स्वेनैव ज्ञातकु
+ शरीर २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उसादिकं स्वस्मादिन्नं वर्णने ॥ आसंच कोश आत्मा
नभवति ॥ आत्मा की दृश्याइतिचेत् ॥ सच्चिदानंदस्वरू
पः ॥ सत्किमितिचेत् ॥ कालत्रयेपिय तिष्ठतितत् स
त् ॥ चित्किमिति ॥ ज्ञानस्वरूपं स्वसंवेद्यं चित् ॥ आ
॥५॥ नंदः कीदृशः ॥ सुखस्वरूपमानंदः ॥ एवं सच्चिदा
नंदस्वरूपं आत्मेति ज्ञानीयात् ॥ ७ ॥ ७ ॥ ७ ॥
अथचतुर्विंशतितत्वोत्पत्तिप्रकारं वक्ष्यामः ॥ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्माश्रया सत्वरजस्तमोगुणात्मिका मायास्तीति
बोधात्॥ ततो आकाशः संभूतः॥ आकाशाद्वायुः॥
वायोरग्निः॥ अग्नेरापः॥ अद्भ्यः पृथ्वी॥ पृथिव्या
ओषधयः॥ ॐषधीभ्यो अन्नं॥ अन्नाद्रेतः॥ रेतसः
पुरुषः॥ एतेषां पंचतत्वानां मध्ये आकाशस्य सा
त्विकांशाच्छ्रोत्रेंद्रिय संभूतं॥ वायुसात्विकां
शांत्वगेंद्रिय संभूतं॥ अग्निसात्विकांशाच्चक्षु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त० पो०

रिंद्रिय संभूतं ॥ जलसालिकांशाज्जिह्वेंद्रिय संभूतं । पृथ्वी
सालिकांशा घ्राणेंद्रिय संभूतं । एतेषां पंचतत्वानां सम
ष्टिसात्विकांशात्मनोबुध्याहंकारचित्तानि तः करणचतु
ष्टयं संभूतं । एतेषां पंचतत्वानां मध्ये आकाशराजसां
॥६॥ शाद्वागेंद्रियसंभूतं ॥ वायुराजसांशात्पाणींद्रियसंभू
तं ॥ अग्निराजसांशात्पादेंद्रिय संभूतं । जलराज
सांशात्गुह्येंद्रिय संभूतं ॥ पृथ्वीराजसांशात्गु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्रियसंभूतं ॥ एतेषां पंचतत्वानां समष्टि राजसांशा
त्प्राणादि पंचकं नागादिपंचवायवश्च संभूताः ॥ एतेषां
पंचतत्वानां तामसांशात् पंचीकृतपंचमहाभूतानि
संभवंति ॥ पंचीकरणं कीदृशमिति चेत् ॥ एतेषां
पंचतत्वानां तामसांशमेकं द्विधा विभज्य ॥ एकं नि
क्षिप्य ॥ द्वौ भागौ चतुर्धा विभज्य ॥ स्वांशं परित्य
ज्य ॥ इतरेषु योजयेदिति एतत्पंचीकरणं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८०

वा०

एतेभ्यः पंचीकृतपंचमहाभूतेभ्यः स्थूलशरीरं ब्रह्मा
ण्डं च संभूतं॥ स्थूलशरीराद्यभिमानिजीवः॥ आ
त्मन्येव प्रकृत्याजीवेश्वरभेददृष्टिः कि न्त्वित्यात्म
कोपाधिति चेत्॥ अविद्योपाधिः सन्नात्मा जीव उ
च्यते॥ मायोपाधिः सन्नात्मा ईश्वर इत्युच्यते॥ एव
मुपाधिभेदाज्जीवेश्वरभेददृष्टिर्यावत्पर्यंतं तिष्ठ ॥७॥
ति तावत्पर्यंतं जन्ममरणादि संसारो न निवर्तते॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माज्जीवेश्वरयोरित्यभेददृष्टिर्या आनीयादित्यर्थः ॥
ननु साहंकारस्य जीवपदस्य निरहंकारस्येश्वरस्या
भेददृष्टिः कथमुपयुज्यते इत्याशंक्याह ॥ जीवपदस्य
ईश्वरपदस्य वाच्यार्थं लक्ष्यार्थं इति अर्थद्वयमस्ती
त्युच्यते ॥ तत्कथमिति चेत् ॥ अविद्या तत्कार्यभूत
कर्तृत्वादिभोक्तृत्वादिगुणाश्च जीवपदस्य वाच्या
र्थः ॥ ईश्वरपदस्य वाच्योऽर्थः कीदृश इति चेत् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग० बो

मायातत्कार्यभूतसर्वज्ञत्वादिगुणाश्च ईश्वरपदस्य वाच्या

र्थः ॥ तस्मादज्ञानोपाधिभूतामविद्यां च तत्कार्याणि परि

त्यज्य ॥ ईश्वरोपाधिभूतां मायां च तत्कार्याणि सर्वज्ञत्वा

दिगुणांश्च परित्यज्य जीवेश्वरयोरैक्यं महावाक्यैश्च

ना। यदुक्तं ॥ तत् ॥ त्वं ॥ असि ॥ महावाक्यं ॥ तच्च लक्षणां वि

विधं ॥ तत्पदे जहल्लक्षणा ॥ तत्किमिति चेत् ॥ गंगायां घो

षः ॥ प्रतिवसति ॥ गंगापदस्य प्रवाहं त्यक्त्वा तत्संबंधा

देव तीरे परिगृहीता इति जहल्लक्षणा ॥ त्वंपदे अजहल्ल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घृणा॥ तत्किमिति चेत्॥ मंत्राः क्रोशंति॥ द्रोणो धावति॥
यत्र वाच्यार्थस्यान्वयः॥ अजित पदे जहदजहत् घृणा॥ त
त्किमिति चेत्॥ यथा छत्रिणो गच्छंति॥ सोऽयं देवदत्तः॥ य
त्र वाच्यैकदेशे त्यागेन एकदेशान्वयः॥ देशकालवस्तु
परिच्छेदनपरित्याग इत्यर्थः॥ सच्चिदानंदादिरूपेयं॥ ब्र
ह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः॥ इति॥ अच्यु
तोहमनंतोहं गोविंदोहमहं हरिः॥ आनंदोहमशेषोह
मदेहमनघ स्वामिन्॥ नित्योहं निर्विकल्पोहं निराका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रो हमन्वयं ।। सच्चिदानंदरूपोहं पूर्णोहं च स्वयं सदा ।।
ब्रह्मैवाहं न संसारि मुक्तोहमिति भावयेत् ।। इति गुरूपदे
शेन स्वतत्वं यथा स्वानुभवेन भये पुमां सोभिजानाति
ते जीवन्मुक्ताः इत्यर्थः ।। ननु जीवन्मुक्तः कीदृश इ
५। ति चेत् ।। अपरोक्षज्ञानवान् जीवन्मुक्तः ।। कीदृ
शमपरोक्षज्ञानमुच्यते ।। यथा देहोहं पुरुषोहं स्त्री
योहमिति दृढनिश्चयज्ञानं तिष्ठति ।। तथा निज
स्वरूपेपि सत्यज्ञानानंदात्माहमेवेति दृढनिश्चयज्ञा



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नं यद्दस्ति तादृशमपरोक्षज्ञानं ॥ अनेन परोक्षज्ञानि
नः सकलकर्मबंधानिवृत्तिः स्यात् ॥ कर्माणि कतिविधा
नि संतीति चेत् ॥ आगामि संचित्तं प्रारब्धमिति त्रिविध
कर्माणि संति ॥ आगामिकर्म कीदृशमिति चेत् ॥ ज्ञानो
त्पत्त्यानंतरं ज्ञानिदेहकृत पापपुण्यरूपकर्म यदस्ति त
दिदमागामिकर्मेत्युच्यते ॥ संचितकर्म कीदृशं ॥
अनंतकोटिजन्मानां बीजरूपं यो कारणभूतं
सत्कर्मजातं तत्संचितकर्मेत्युच्यते ॥ प्रार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गा० ब्धकर्कीडं०॥ इदं शरीरं जनइत्येहलोके एवं सुखदुःखा
दिकं कर्मयदस्ति तत्प्रारब्धकर्मेत्युच्यते॥ भोगेन
नष्टं भवति॥ प्रारब्धकर्मणां भोगे भोगादेव क्षयं इ
ति न्यायात्॥ संचितकर्म ज्ञानाग्निना दग्धं भवति॥
गा० ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन इति भग
वद्वचनात्॥ आगामिकर्म नलिनीदलगतज
लवत्॥ ज्ञानिनां संबंधो ना[illegible]स्त्येव॥ इदमागामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कार्मफलं नस्यादित्याशंक्याह ॥ ज्ञानिनां लोके ये पुमांसः
अंन्नवस्त्रादिद्रव्यार्पणं करोति तेषां तत्सुकृतं सुकृत
मागामिष्यति ॥ ये चैतान्प्रद्वेष्यंति तिरस्कुर्वंति तेषां त
त्कृतं सर्वपापकर्मागामिष्यति ॥ इत्येवंप्रकारेण ज्ञा
नी संफलकर्मबंधेभ्यस्तरतीति श्रुतेरपिप्रमाण
मस्तीत्युच्यते ॥ तरति शोकमात्मवित् ॥ एको
देवः सर्वभूतेषु गूढः सर्वव्यापि सर्वभूतांतरात्मा ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो
निर्गुणश्चेति श्रुतेः ॥ भिद्यते हृदयग्रंथिः छिद्यंते सर्व
संशयाः ॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे पराव
॥११ रे ॥ ज्ञानिदेहो गंगायां वा चांडालगृहे वारण्ये वाऽपि
कायां विसृजति स्मरति वा सति तर्हि अमृतत्वमा
प्नुः कुलं पवित्रं जननी कृतार्था वसुंधरा
पुण्यवती चेते जनं ॥ आपादसंधिस्तु खसा

॥

गरोस्मि रत्नौ नं परे ब्रह्मणि कस्य चेतः ।। स्नां
नं तेन सकलतीर्थसलिले दत्ता द्विजेभ्यो महि
यज्ञानां च कृतं सहस्रमखिलं देवाश्च संत
र्पिताः ।। संसाराच्च समुद्धृतास्स्वपितरो त्रै
लोक्यपूज्योप्यसौ यस्य ब्रह्मविचारणे क्ष
णमपि स्थैर्यं मनः प्राप्नुयात् ।। यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८ ७०

मानि यथाप्रोक्तं तत्वबोधे यदीपतं॥ विम तस्या
दशेषेण सुज्ञावेन सुखी भवेत्॥ ॥ इति श्री वा
सुदेवेंद्र स्वामि लब्ध चरण प्रसाद यश्चन्द्रासि
हेंद्र विरचितं तत्वबोधः प्रकरणं समाप्तं॥ श्री
१३॥ पंडरी क्षेत्रे याद्वेंद्र स्वार्थं परोपकारार्थं लि
खितमिदं पुस्तकं॥ श्री पांडुरंगार्पणमस्तु॥ ७॥
शके १७३३ फा॰ व॰ २ रवौ वैकुंठ स्वामि संनिधौ समाप्तं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिरण्यगर्भ इत्युच्यते ॥ एतत्सूक्ष्मशरीराभिमानिनः ॥ कारणे तु उपसं
हृतेषु जाग्रदित संस्कारजप्रत्ययः स विषयः स्वप्नः ॥ तदुभया
भिमान्यात्मा तैजसः ॥ इति त्रयं प्रकारः ॥ शरीरद्वय कारण मा
त्मोज्ञानं साभासमव्याकृतमित्युच्यते ॥ तच्च ॥ न सत् ॥ नाऽ
सत् ॥ नापि सदसत् ॥ न भिन्नं ॥ नाऽभिन्नं ॥ नापि भिन्नाभि
न्नं ॥ कुतश्चित् ॥ न निरवयवं ॥ न सावयवं ॥ नोऽभयं ॥ के
वलं ब्रह्मात्मैकत्वज्ञानापनोद्यं ॥ सर्वप्रकारकज्ञानोऽ
पसंहारो बुद्धेः कारणात्मनावस्थानं सुषुप्तिः ॥ तदु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५. ३.

भयाभिमान्यात्माप्राज्ञः ॥ एतत्त्रयं मकारः ॥ अकार उकारः ॥
उकारो मकारः ॥ मकार ओंकारः ॥ ओंकारोऽहमेव ॥ अहमात्मा
साक्षी ॥ केवलं कूटस्थ चिन्मात्रस्वरूपो नाज्ञानं तत्कार्यं ॥
किंतु ॥ सच्चित्परिपूर्णपरानंदनित्यशुद्धबुद्धमुक्तसत्यपरज्ञान
११२॥ परमानंदाऽद्वयं ब्रह्मैवाहमस्मि ॥ अहं ब्रह्मास्मीत्यभेदेनाऽ
वस्थानं समाधिः ॥ सयश्चायं पुरुषे यश्चासावादित्ये स एकः
प्राणोऽस्मि प्रज्ञात्मा ॥ तत्त्वमसि ॥ त्वं तदसि ॥ त्वं ब्रह्मासि ॥ हं अ
ब्रह्मास्मि ॥ ब्रह्माहमस्मि ॥ अयमात्मा ब्रह्म ॥ अन्यदेवतद्वि

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीसीतारामचंद्रभ्यो नमः॥ श्रीसद्गुरुचरणाभ्यां नमः॥ अथ
॥पंचीकरणोपनिषल्लिख्यते॥ यो ब्रह्माणं विदधाति पूर्वं॥
यो वै वेदांश्च प्रहिणोति तस्मै॥ तं ह देवमात्मबुद्धिप्रकाशं मुमु
क्षुर्वै शरणमहं प्रपद्ये॥१॥ अथातः परमहंसपरिव्राजका
नां समाधिविधिं व्याख्यास्यामः॥ सच्छब्दवाच्यमविद्याश
अव्य॥ बलं ब्रह्मणोऽव्यक्तं अव्यक्तान्महत्॥ महतोऽहंकारः॥
अहंकारात्पंचतन्मात्राणि॥ पंचतन्मात्रेभ्यः पंचमहाभू
तानि॥ पंचमहाभूतेभ्योऽखिलं जगत्॥ पंचमहाभू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं०	३०

तानामेकैकं द्विधा विभज्य स्वार्द्धभागं विहाय भूदितरेषु
च पंचधा पंची कृतं पंचीकरणं भवति ॥ अध्यारोपापवा
दाभ्यां निष्प्रपंचं प्रपंच्यते ॥ अथ पंचीकृतपंचमहाभू
तानि तत्कार्यं चैव विराडित्युच्यते ॥ एतत्स्थूलशरीर
मात्मनः इंद्रियैरर्थोपलब्धोर्जागरितं ॥ तदुभयाभिमा
न्यात्मा विश्वः ॥ एतत्त्रयं अकारः ॥ अपंचीकृतपंचम
हाभूतानि ॥ तत्कार्यं च सप्तदशकं लिंगं भौतिकं

सर्वं ॥३॥

14

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मा॥ स्थूलशरीरं कीदृ० पंचीकृतपंचमहाभूतैः कृ
तं सत्कर्मजन्यं सुखदुःखादिभोगायतनं स्थूलशरी
रं॥ अस्ति। जायते। वर्द्धते। विपरीणमते। अपक्षियते।
विनश्यतीति षड्भावविकारैः सहमध्ये॥ गसम
ध्येग छति॥ जरामरणोर्मिछेन्न स्थूलं॥ सूक्ष्मश
रीरं कीदृ०॥ अपंचीकृतपंचमहाभूतैः कृतं सत्कर्म
जन्यं सुखदुःखादिभोगसाधनं ज्ञानेंद्रियाणि पंच कर्मे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८० ओं

द्रियाणि पंच प्राणादि पंचवायवो मनश्चैकं बुद्धिश्चै
का॥ एवं सप्तदशकलाभिः सहयत्तिष्ठति॥ स्वधा
त्पारलौकिकभोगो भिमिंछेत्तत्सूक्ष्मं॥ कारणशरी
१३॥ रं की० अनाद्यनिर्वचनीयं शरीरयोः यत्का
रणमात्रं सत् स्वस्वरूपस्य ज्ञानं यदस्ति तत्का
रणशरीरमित्युच्यते॥ अवस्थात्रयं की०॥
जाग्रत्स्वप्नसुषुप्त्यवस्था [illegible] स्ति स्त्रोवर्तते॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आगद्वस्पाकीह° ॥ (श्रोत्रादिज्ञानेंद्रियैश्च स्वसु
द्विषया श्रद्धायन्नराति आगद्व द्वस्पा ॥ स्वरू
ठश्चरीराभिमान्यात्मा विश्वे स्यत्यते ॥ स्वभा
वस्पाकी ह° ॥ आगद्वस्पायां प्रदृष्टं यद्वृतं
तज्ज्ञनितं वासनया निद्रासमयेयः प्रपंचः
प्रतीयते सा स्वभावस्पा ॥ स्वभावस्पा
स्वरूपद्वारीराभिमान्यात्मा तैजस इत्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ता०																		वि०

च्यते॥ सुषुप्त्यवस्था कीदृ० अहं किमपि न जा
नामि सुखेन मया निद्रानुभूतेति यज्ज्ञानं अस्ति
सा सुषुप्त्यवस्था॥ सुषुप्त्यवस्थाकारणशरीराभि
॥७॥ मान्यात्मा प्राज्ञ इत्युच्यते॥ पंचकोशाः कीदृशाः॥
अन्नमयप्राणमयमनोमयविज्ञानमयानंदम
यकोशाः इति॥ अन्नमयकोशः कीदृ० अन्नरसेनै
व भूत्वा अन्नरसेनैवाभिवृद्धिं प्राप्य अन्नरूपपृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपिणी ब्रह्मन्द्रान्किरेव प्रकृतिः ॥ परमात्मेति च ॥ दे
हादेः परं तत्स्थद्वलोवे परमात्मा ॥ स ब्रह्मा स विष्णुः स रु
द्रः स इंद्रः स स्वाग्निः स सूर्यः स चंद्रमाः स सुरां सासुराः
स पितृगन्धर्वाः स मनुष्याः स स्थिरः स पश्वादयः स
स्थावरं स आत्मनामयः ॥ स सर्वमिदं ब्रह्म नेह ना
नास्ति किंचन ॥ आत्मेति चं ॥ न चर्मणो न रक्त
स्य न मांस स्यान्न चास्थिनो ॥ न आतिरात्मनो आति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यवहारोपकल्पिता॥ कर्मेति च॥ क्रियमाणे इंद्रि
यैः कर्म नाहं करोमीति॥ अध्यात्मनिष्ठतया कृतं कर्मैव
कर्म॥ अकर्मेति च॥ नित्यनैमित्तिकयागव्रततपोदाना
५॥ दिफलाभिसंधानं यत्तत्कर्म॥ तपइति च॥ ब्रह्मैवस
र्वं जगन्मिथ्येति अपरोक्षज्ञानाग्निना ब्रह्माद्यैश्वर्य
संकल्पबीजखंडनरूपं तपः॥ आसुरमिति च॥ श्र
आदिस्मृतदेहदंडादिना मैश्वर्यकामनया निरशना



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिले त्यादी छांतरात्मानं संतापयन्नाचरितं मस्कग्रंरा
ग द्वेषाहंकारहिंसादंभाद्युपेतं तप आसुरं ॥ ज्ञानमि
ति च ॥ एकादशेंद्रियनिग्रह सद्गुरूपासन श्रवणमन
न निदिध्यासनैर्द्रष्टा दृग्दृश्य रूपस्वरूपं सर्वांतरस्थं
सर्वश्च समघटपटादिपदार्थेषु विकारेषु विकार
पैलन्यांपिभा न किंचिद स्तीति साक्षात्कारानुभव
ज्ञानं ज्ञानं ॥८॥ अज्ञानमिति च ॥ १०॥ सर्पमिथ्या दृष्टि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नि. ३०

तीये सर्वानुस्यूते सर्वमये ब्रह्मणि देवतिर्यङ्मनुष्यस्था
वरजंगमस्त्रीपुरुषवर्णाश्रमबंधमोक्षादिनानात्वं
कल्पितज्ञानमज्ञानं ॥ बंधइति च ॥ अनाद्यविद्या
भा। वासनयाजातोऽहमित्यादिसंकल्पो बंधः ॥ पितृ
मातृसहोदरदारापत्यगृहारामक्षेत्रममता सं
सारावर्णसंकल्पो बंधः ॥ नित्यनैमित्तिकानुष्ठान घ
संकल्पो कामादिसंकल्पो कर्तृत्वाद्यहंकारसंक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल्पोऽजआभयसंज्ञायादिगुणसंकल्पात्।। देवमनुष्या
धुणसनाकामसंकल्पो यज्ञव्रततपोदाननानाविधि
विधानसंकल्पो उपरमाद्यष्टांगयोगाभ्याससंकल्पो अ
णिमाद्यैश्वर्यसिद्धिसंकल्पोमोक्षापे[illegible]क्षासंकल्पो इ
त्यादिसकलसंकल्पमात्रसंभवे बंधः ।। मोक्षस्वरूपम्
नित्यानित्यवस्तुविचारादनित्यसंसारविषयसम
स्तबंधसंकल्पक्षयो मोक्षः ।। सुखपादि नित्या सच्चि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।गि॰

तन्नेहानुभवोद्भवसंकल्पमोक्षणं सुखं ॥ दुःखमिति च ॥ अ
नात्मसुखविषयसंसारसंकल्पमेव दुःखं ॥ स्वर्ग इति च ॥
सत्संग एव स्वर्गः ॥ नरक इति च ॥ असज्जनसंसारवि
षयजनैः संसर्ग एव नरकः ॥ परमपदमिति च ॥ प्रा
७॥ णेन्द्रियांतःकरणगुणादेः परं ब्रह्म ॥ चिदानंदमयं सर्व
साक्षिणं नित्यमुक्तं ब्रह्मस्थानं परमपदं ॥ उपास्य इ
ति च ॥ सर्वशरीरस्थचैतन्यं ब्रह्म प्रापको गुरुरुपा
स्यः ॥ विद्वानिति च ॥ सर्वशरीरांतरस्थं सर्वसमभेफर



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संसंविद्रूपं परमात्मानं ॥ स्वसंविद्रूपेणयोवीसविद्वान् ॥८

स्पद्यतिश्रु ॥ देहवर्णाश्रमकर्त्तव्यो कर्त्तव्य ममत्व अ

भिमानाहंकारभावनारूढो मूढः ॥ संन्यासमितिच ॥८

सर्वधर्मान्परित्यज्यात्मनिर्मोनिरहंकारोभूत्वाब्रह्मेष्टं

शरणमभिगंम्यतत्त्वमसि सर्वंखल्विदंब्रह्मनेहना

नास्तिकिंचनेत्यादिमहावाक्यार्थानुभवज्ञानात् ॥ ब्र

ह्माहमस्मीतिनिश्चित्यनिर्विकल्पसमाधिनास्व

तंत्रोयश्चरतिसमुक्तः सपूज्यः सयोगी सपरमहंसः ॥८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]

निं०उ०

सोपधृत: ससंन्यासी भवति ।। आह्यमितिच ।। स्वस्वरूप अतिरि
क मायामनोमयं बुध्यादींद्रिय गोचर जगत्सर्व लचिंतनं मया
माहं ।। निरालंबोपनिषज्जो धीते स सर्वभय भ्रमाद्‌सा
सर्पात्कामान्तुपभुंज मुक्त बंध: स न पुनर्नाभिजायते पु
।।न।। नर्नाभिजायते ।। इति निरालंबोपनिषत्समाप्तं ।। सं
न्यासेनतनुसजेदितिस्मृते: ।। छ ।। छ ।। छ ।। छ ।।
शके १७३३ फा. कृ. ४ चंद्रे वैकुंठस्वामिसंनिधौ पंढरी
क्षेत्रेसमाप्तिमगमत् ।। श्रीपांडुरंगार्पणमस्तु ।। छ ।।

[illegible]

KKSU LIBRARY RAMTEK 441 106 Dist Nagpur M 1449

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=16.10.20 14:30
,TRANSFERRED=2020/10/16 at 14:34:54
,PAGES=39
,TYPE=STD
,NAME=S0004052
,Book Name=M-1449-NIRALAMB UPNISHAD
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection